अविनीतः, त्रि, (न विनीतः। नञ्तत्पुरुषः।) विनयरहितव्यक्तिः। तत्पर्य्यायः। समुद्धतः २। इत्यमरः॥ (यथा,—
"न चापि प्रतिकूलेन नाविनीतेन रावण!।
राज्यं पालयितुं शक्यं राज्ञा तीक्ष्णेन वा पुनः"॥
इति रामायणे। अनियमितः। यथा,—
"नाविनीतैर्व्रजेद्धूर्य्यै न च क्षुद्व्याधिपीड़ितैः"॥
इति मनुः।)

अविनीता, स्त्री, (न विनीता। नञ्तत्पुरुषः।) पुंश्चली। असती। इति हेमचन्द्रः॥

अविपटः, पुं, (अवि+पटच्।) अवीनां विस्तारः इति संक्षिप्तसारव्याकरणपरिशिष्टं। कम्बलादिः॥

अविप्रियः, पुं, (अवि+प्री+क।) श्यामाकतृणं। इति राजनिर्घण्टः॥ (यदा न विप्रिय इत्येवं स्यात् तदा इष्टः।)

अविप्रिया, स्त्री, (अवीनां मेषादीनां प्रिया।) श्वेतालता। इति राजनिर्घण्टः॥

अविभक्तः, त्रि, (न विभक्तः। नञ्तत्पुरुषः।) अपृथक्। यथा ज्योतिश्चिन्तामणौ।
"विभक्ता अविभक्ता वा कुर्य्युः श्राद्धमदैविकं।
मघासु च तथान्यत्र नाधिकारः पृथग्विना"॥
इति मलमासतत्त्वं॥

अविभाज्यं, त्रि, (न विभाज्यम्। नञ्तत्पुरुषः।) विभागायोग्यं। अथ विभाज्याविभाज्ये। तत्र व्यासः।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनं।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत्"॥*॥
विद्याधनमाह कात्यायनः।
"उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्ब्बकं।
विद्याधनन्तु तद्विद्यात् विभागे न नियोजयेत्॥
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्॥
विद्याधनन्तु तत्प्राहुर्विभागे न प्रयोजयेत्।
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत्॥
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्ब्बकं।
विद्याधनन्तु तद्विद्यात् न विभाज्यं बृहस्पतिः"॥*॥
यदि भवान् भद्रमुपन्यस्यति तदा भवत एव मयैतद्देयमिति पणितं यत्रोपन्यासं निस्तीर्य्य लभते तन्न विभाज्यं। शिष्यादध्यापितात्। आर्त्विज्यतः यजमानाद्दक्षिणया लब्धधनं न प्रतिग्रहलब्धं वेतनरूपत्वात्तस्य। तथा यत्किञ्चिद्विद्याप्रश्ने निस्तीर्णेऽपणितं यदि कश्चित् परितोषाद्दाति। तथा योऽस्मिन् शास्त्रार्थे अस्माकं संशयमपनयति तस्मै धनमिदं ददानीत्युपस्थितस्य संशयमपनीय यल्लब्धं। वादिनोर्व्वा सन्देहे न्यायकरणार्थमागतयोः सम्यङ्निरूपणेन यल्लब्धं धनांशादिकं तथा शास्त्रादिप्रसङ्गेण ज्ञानं सम्भाव्य यत् प्रतिग्रहादिना लब्धं। तथा शास्त्रज्ञानविवादे अन्यत्रापि यत्र कुत्रचिदन्योन्यज्ञानविवादे निर्ज्जित्य यल्लब्धं। तथैकस्मिन् देये बहूनामुपन्नते येन प्रकृष्टत्वात् यल्लब्धं। तथा शिल्पादिविद्यया चित्रकरसुवर्णकारादिभिर्यल्लब्धं। तथा द्यूतेनापि परं निर्ज्जित्य यल्लब्धं। तत्सर्व्वमविभाज्यमितरैः। तस्मादयया कयाचिद्विद्यया लब्धमर्ज्जकस्यैव तन्नेतरेषामिति। प्रदर्शनार्थन्तु कात्यायनेन विस्तारितमिति दायभागः॥*॥ नारदः।
"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्"॥
बिभृयादित्येकवचननिर्देशान्न बहवः। यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्द्धयति तदा तद्विद्यार्ज्जितधने तस्याधिकारः। अश्रुतो मूर्खः। कल्पतरुमिताक्षरादीपकलिकासु। कात्यायनः।
"परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या।
तया लब्धं धनं यत्तु विद्यालब्धं तदुच्यते"॥
अन्यतः पितृमातृकुलव्यतिरिक्तात्॥*॥ अत्र विशेषयति स एव।
"नाविद्यानान्तु वैद्येन देयं विद्याधनात् क्वचित्।
समविद्याधिकानान्तु देयं वैद्येन तद्धनं"॥
तत्रोक्तरितविद्यापदमुभाभ्यां सम्बध्यते तेन समविद्याधिकविद्यानां भागो न तु न्यूनविद्ययोः। वैद्येन विदुषा॥*॥ पुनर्व्विशेषयति।
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः"॥
कुले स्वकुले पितामहपितृव्यादिभ्यः। पितृत एव वा। शिक्षितविद्यानां भ्रातॄणां। यद्विद्याशौर्य्यप्राप्तं धनं तद्विभजनीयमिति कल्पतरुरत्नाकरौ। पुनः कात्यायनः॥
"ध्वंशहरोऽर्द्धहरो वा पुत्त्रवित्तार्ज्जनात् पिता"।
पुत्त्रवित्तार्ज्जनात्। ल्यब्लोपे पञ्चमी। अनभिहितभावो द्रव्यवत् प्रकाशत इति न्यायात् पुत्त्रार्ज्जितवित्तात् पितुर्द्व्यंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च। अर्ज्जकस्य तु द्व्यंशित्वं भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाणव्यासवचनात्। पितुरर्द्धहरत्वन्तु पितृद्रव्योपघातादगुणवत्त्वादेति दायभागः। अनुपघाते पिता द्व्यंशहरः अर्ज्जकत्वात् स्वयमपि द्व्यंशहरः इतरेषामनंशित्वं। भ्रातृद्रव्योपघाते तु तस्याप्येकांश इति द्व्यंशार्द्धांशयोर्भेदकथनं॥*॥ पुनः कात्यायनः।
"गोप्रचारश्च रथ्या च वस्त्रं यच्चाङ्गयोजितं।
प्रायोज्यं न विभज्येत शिल्पार्थन्तु बृहस्पतिः"॥
प्रायोज्यं यदस्य प्रयोजनार्हं पुस्तकादि न तन्मूर्खादिभिः सह पण्डितादिभिर्व्विभजनीयं एवमेव दायभागमदनपारिजातादयः। याज्ञवल्क्यः।
"पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्"।
पुत्त्रदुहित्रोर्यदलङ्कारादि दत्तं तत्तस्यैवेति शूलपाण्युपाध्यायाः॥ नारदः।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनम्भवेत्।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः"॥
प्राप्तञ्च धन भार्य्येति भरद्वाजवचनात् भार्य्याप्राप्तिकाले लब्धं धनं भार्य्याधनमौद्वाहिकमित्यर्थः, चोभे इत्यत्र चैवेति पाठे एतत्किंश्चित्वान्यद्विभजेदित्यनुवर्त्तते अत एतान्यविभाज्यानीति। न वास्तुविभागो नोदकपात्रालङ्काररोपयुक्तस्त्रीवाससामपां प्रचाररथ्यानां विभागश्च इति प्रजापतिरिति। यस्मिन् वास्तुनि येन गृहोद्यानादिकं कृतं अपरेणापि स्थानान्तरे तथा कृतञ्चेत् तदा येन यत् कृतं तत्तस्यैव। अन्यथा-पैवं॥*॥ साधारणधनार्ज्जितेऽपि विशेषमाह व्यासः।
"साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधं।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः"।
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः। तस्यार्ज्जकस्य। साधारणोपघाते यस्य यावतोऽंशस्याल्पस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्येति दायभागः॥ याज्ञवल्क्यः।
"क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः।
दायादेभ्यो न तद्दद्यात् विद्यया लब्धमेव च"॥
पितृपितामहागतं बलादन्यैर्हृतं योंऽशान्तराणामनुज्ञया उद्धरति तदंशान्तरेभ्यो न दद्यात्॥*॥
भूमौ तु विशेषयति शङ्खः।
"पूर्ब्बनष्टाञ्च यो भूमिमेक एवोद्धरेत् श्रमात्।
यथाभागं भजन्त्यन्ये दत्त्वांशन्तु तुरीयकं"॥
एतद्वचनं स्मृतिमहार्णवकामधेनुपारिजातप्रभृतिष्वलिखनादयुक्तमेवेति रत्नाकरः। तन्न, दायभागमिताक्षराप्रभृतिभिर्लिखितत्वात्। इति दायतत्त्वं॥

अविमरीसं, क्ली, (अवि+मरीसच्। अवेर्दुग्धे मरीसच्प्रत्ययः।) मेषदुग्धं। इति हेमचन्द्रः॥
("तर्पणाश्चोतनैर्नस्यैरहृद्यन्तूष्णमाविकं"॥
इति शार्ङ्गधरः॥)

अविमुक्तं, क्ली, (वि+मुच्+क्त। ततो, न विमुक्तम्। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। यथा,—
"मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन।
विमुक्तं न शिवाभ्यां यदविमुक्तं ततो विदुः॥
अविमुक्तं तदारभ्य क्षेत्रमेतदुदीर्य्यते।
अस्यानन्दवनं नाम पुराऽकारि पिनाकिना।
क्षेत्रस्यानन्दहेतुत्वादविमुक्तमनन्तरं॥
आनन्दकन्दवीजानामङ्कुराणि यतस्ततः।
ज्ञेयानि सर्व्वलिङ्गानि तस्मिन्नानन्दकानने॥
अविमुक्तमिति ख्यातमासीदित्थं घटोद्भव"।
इति काशीखण्डे २६ अध्यायः॥ (मूर्द्धचिवुकान्तरालस्थाने च। यथा,—
'एष योऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठितः'
इति। "आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचिवुकान्तराले"। इति च भाष्ये।)

अविमुक्तः, पुं, (न विमुक्तः। नञ्तत्पुरुषः।) वाराणसीक्षेत्रं। इति काशीखण्डे। अत्यक्ते त्रि॥

अविरतं, क्ली, (न विरतम्। नञ्तत्पुरुषः।) सततं। अनवरतं।
("अविरतोज्झितवारिदपाण्डुभिर्विरहितैरचिरद्युतितेजसा"॥
इति किरातार्ज्जुनीये।) तद्वति त्रि। इत्यमरः॥

अविरलं, त्रि, (न विरलं। नञ्तत्पुरुषः।) विरलरहितं। तत्पर्य्यायः। निविरीसं २ घनं ३